अपि च ।

"अर्थिनाभिहितो योऽर्थः प्रत्यर्थी यदि तन्तथा।
प्रपद्य कारणं ब्रूयात् प्रत्यवस्कन्दनं हि तत् ॥"
इति व्यवहारतत्त्वे बृहस्पतिवचनम् ॥

प्रत्यवस्थाता, [ऋ] त्रि, (प्रतिपक्षतया अवतिष्ठते इति । प्रति+अव+स्था+तृच् ।) शत्रुः । इति हेमचन्द्रः । ३ । ३९२ ॥

प्रत्यवायः, पुं, (प्रत्यवाय्यते इति । प्रति+अव+अय गतौ+घञ् ।) पापम् । दुरदृष्टम् । यथा,
"स्वयं केचिदुपात्तस्य दुरितस्य प्रचक्षते ।
अनुत्पत्तिं तथा चान्ये प्रत्यवायस्य मन्यते ॥"
इत्येकादशीतत्त्वे जावालवचनम् ॥

प्रत्यश्मा, [न्] पुं, (प्रतिरूपः अश्मा ।) गैरिकम् । इति त्रिकाण्डशेषः ॥

प्रत्यहं, व्य, (अहः अहः प्रति । "नपुंसकादन्यतरस्याम् ।" ५ । ४ । १०९ । इति टच् ।) प्रतिदिनम् । यथा, कुमारसम्भवे ।
"गिरिशमुपचचार प्रत्यहं सा सुकेशी ॥"

प्रत्याकारः, पुं, (प्रतिरूपः खड्गेन सदृश आकारो यस्य ।) खड्गकोषः । इति हेमचन्द्रः । ३ । ४४७ ॥ खाप् इति भाषा ॥

प्रत्याख्यातः, त्रि, (प्रति+आ+ख्या+क्तः ।) दूरीकृतः । तत्पर्य्यायः । प्रत्यादिष्टः २ निरस्तः ३ निराकृतः ४ निकृतः ५ विप्रकृतः ६ । इत्यमरः ।३।१।४०॥ क्वचित् पुस्तके प्रत्यादिष्टेत्यादिश्लोकमेकमधिकं दृश्यते तत्राद्यचतुष्कं प्रत्यादिष्टे । परचतुष्कं तिरस्कृते । इति तट्टीकासारसुन्दरी ॥ (यथा, महाभारते । १ । १५६ । ८ ।
"वीरेणाहं तथानेन त्वया वापि यशस्विनि ! ।
प्रत्याख्याता न जीवामि सत्यमेतद्ब्रवीमि ते ॥")

प्रत्याख्यानं, क्ली, (प्रति+आ+ख्या+भावे ल्युट् ।) निराकरणम् । तत्पर्य्यायः । निरसनम् २ प्रत्यादेशः ३ निराकृतिः ४ । इत्यमरः ।३।२।३१ ॥ (यथा, मार्कण्डेये । ६१। ७२ ।
"प्रत्याख्यानादहं त्वत्तुः त्वञ्च पापमवाप्स्यसि॥")

प्रत्यागमः, पुं, (प्रत्यागमनमिति । प्रति+आ+गम्+अप् ।) प्रत्यागमनम् । फिरे आसा इति भाषा । यथा,—
"तीर्थयात्रासमारम्भे तीर्थप्रत्यागमेषु च ॥"
इति प्रायश्चित्ततत्त्वम् ॥
(यथा, हरिवंशे भविष्यपर्व्वणि । ३६ । २४ ।
"किमर्थं ब्रूहि विप्रेन्द्र । अस्मिन् प्रत्यागमो हि वः ॥")

प्रत्यादिष्टः, त्रि, (प्रत्यादिश्यते स्मेति । प्रति+आ+दिश्+क्तः ।) प्रत्यादेशविशिष्टः । तत्पर्य्यायः । निरस्तः २ प्रत्याख्यातः ३ निराकृतः ४ निकृतः ५ विप्रकृतः ६ । इत्यमरः । ३। १।४० ॥

प्रत्यादेशः, पुं, (प्रत्यादेशनमिति । प्रति+आ+दिश्+घञ् ।) निराकरणम् । प्रत्याख्यानम् । इत्यमरः । ३ । २ । ३१ ॥ (यथा, मेघदूते । ९६ ।
"प्रत्यादेशादपि च मधुनो विस्मृतभ्रूविलासम् ॥"
प्रसङ्गनिवारणम् । इति कुल्लूकभट्टः ॥ यथा, मनुः । ८ । ३३४ ।
"येन येन यथाङ्गेन स्तेनो नृषु विचेष्टते ।
तत्तदेव हरेत्तस्य प्रत्यादेशाय पार्थिवः ॥")
भक्तं प्रति देवानामादेशश्च ॥

प्रत्याध्मानः, पुं, (प्रतिगतमाध्मानमीषत्-शब्दो यत्र ।) वातव्याधिविशेषः । तस्य लक्षणमाह ।
"विमुक्तपार्श्वहृदयं तदेवामाशयोत्थितम् ।
प्रत्याध्मानं विजानीयात् कफव्याकुलितानिलम्॥"
विमुक्तपार्श्वहृदयं पार्श्वे हृदये विहाय जातं तदेवाध्मानम् । कफव्याकुलितानिलं कफेनावरुद्धवातम् ॥ * ॥ अथ तस्य चिकित्सा ।
"प्रत्याध्माने समुत्पन्ने कुर्य्यात् वमनलङ्घने ।
दीपनादि नियुञ्जीत पूर्व्ववद्वस्तिकर्म्म च ॥"
इति भावप्रकाशः ॥

प्रत्यालीढं, क्ली, (प्रति+आ+लिह+क्तः ।) धन्विनां पादसंस्थानविशेषः । तत्रोर्द्धस्य वामपादप्रसारं दक्षिणपादसङ्कोचः । इत्यमरटीकायां भरतः ॥ धन्विनामवस्थानविशेषः । यथा,—
"स्यात् प्रत्यालीढमालीढं समं पादं तथापरम् ।
वैशाखं मण्डलञ्चेति धन्विनां स्थानपञ्चकम् ॥
स्याद्दक्षपादसङ्कोचात् वामपादप्रसारणात् ।
प्रत्यालीढमिति प्रोक्तमालीढं तद्विपर्य्ययात् ॥
तुल्यं पादयुगं यत्र समपादमुदाहृतम् ।
वितस्त्यन्तरितं पादयुगं वैशाखमुच्यते ।
मण्डलाकारपादाभ्यां मण्डलं स्थानमीरितम् ॥"
इति शब्दरत्नावली ॥
(यथा च यादवः ।
"स्थानानि धन्विनां पञ्च तत्र वैशाखमस्त्रियाम् ।
वितस्त्यन्तरगौ पादौ मण्डलं तोरणाकृती ॥
समानौ स्यात् समपदमालीढं पदमग्रतः ।
दक्षिणं वाममाकुञ्च्य प्रत्यालीढं विपर्य्ययः ॥")
आश्रिते, त्रि । इति मेदिनी । ढ, १२ ॥

प्रत्याशा, स्त्री, (प्रति किञ्चित् वस्तु लक्षीकृत्य आ समन्तात् अश्नुते व्याप्नोतीति । प्रति+आ+अश्+अच् । ततष्टाप् ।) आकाङ्क्षा । यथा, शान्तिशतके ।
"मूढोऽन्यत्र मरीचिकासु पशुवत् प्रत्याशया धावति ॥"

प्रत्यासन्नः, त्रि, (प्रति+आ+सद्+क्तः ।) निकटवर्त्ती । इति जटाधरः ॥ (यथा, प्रबोधचन्द्रोदये २ अङ्के ।
"आर्य्य! प्रत्यासन्नो महाराजः । तत्प्रत्युद्गमनेन संभाव्यतामार्य्येण ॥")

प्रत्यासरः, पुं, (प्रत्यास्रियते इति । प्रति+आ+सृ+"ऋदोरप् ।" ३ । ३ । ५७ । इत्यप् ।) सैन्यपृष्ठः । इति शब्दरत्नावली ॥

प्रत्यासारः, पुं, (प्रत्यास्रियते इति । प्रति+आ+सृ+घञ् ।) व्यूहस्य पश्चाद्भागः । व्यूहस्य पश्चाद्व्यूहान्तरम् । तत्पर्य्यायः । व्यूहपार्ष्णिः २ । इत्यमरभरतौ ॥

प्रत्याहरणं, क्ली, (प्रति+आ+हृ+भावे ल्युट् ।) प्रत्याहारः । इति शब्दरत्नावली ॥

प्रत्याहारः, पुं, (प्रति+आ+हृ+भावे घञ् ।) स्वस्वविषयेभ्य इन्द्रियाकर्षणम् । तत्पर्य्यायः । उपादानम् २ । इत्यमरः ॥ प्रत्याहरणम् ३ । इति शब्दरत्नावली ॥ स च योगाङ्गविशेषः । यथा,
"प्रत्याहारश्च तर्कश्च प्राणायामस्तृतीयकः ।
समाधिर्धारणं ध्यानं षडङ्गो योगसंग्रहः ॥"
इति तट्टीकायां भरतः ॥
प्रत्याहारमाह ।
"शब्दादिष्वनुरक्तानि निगृह्याक्षाणि योगवित् ।
कुर्य्याच्चित्तानुकारीणि प्रत्याहारपरायणः ॥"
इति विष्णुपुराणे ६ अंशे ७ अध्यायः ॥
अपि च ।
"इन्द्रियाणीन्द्रियार्थेभ्यः समाहृत्य स्थितो हि सः ।
मनसा सह बुद्ध्या च प्रत्याहारेषु संस्थितः ॥"
इति गारुडे २४० अध्यायः ॥
(यथा च पातञ्जले साधनपादे ।
"यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि ॥" २९ ॥
"स्वस्वविषयसंप्रयोगाभावे चित्तस्वरूपानुकार इन्द्रियाणां प्रत्याहारः ॥" ५४ ॥)
अल्पेन बहूनां ग्रहणम् । यथा, अच् इति हाचरेण सर्व्वस्वराणां ग्रहणम् । इति भरतः ॥

प्रत्युक्तिः, स्त्री, (प्रतिवचनमिति । प्रति+वच्+भावे क्तिन् । प्रतिरूपा उक्तिरिति वा ।) प्रत्युत्तरम् । इति शब्दरत्नावली ॥

प्रत्युत, व्य, (प्रति च उत च इति द्वन्द्वः ।) वैपरीत्यम् । यथा । बुधादिवाक्यं तु न नियामकं प्रमाणाभावात् प्रत्युत फलश्रुतेर्गुणफलबोधकमिति । इति तिथ्यादितत्त्वे जन्माष्टमीप्रकरणम् ॥
(यथा मार्कण्डेये । ६५ । २० ।
"विहिताकरणात् पुंभिरसद्भिः क्रियते तु यः ।
संयमो मुक्तये सोऽन्ते प्रत्युताधोगतिप्रदः ॥")

प्रत्युत्क्रमः, पुं, (प्रत्युत्क्रमणमिति । प्रति+उत्+क्रम्+घञ् ।) प्रधानप्रयोजनानुकूलप्रयोजनानुष्ठानम् । तत्पर्य्यायः । प्रयोगार्थः २ । इत्यमरः ॥ प्रकृष्टयोगः । इति केचित् । प्रकृष्टयुद्धार्थसुपक्रमः प्रयोगः तद्वाच्यः । इति केचित् । प्रयोगो युद्धं तदभिधेय इति केचित् । प्रत्युत्क्रमो युद्धार्थ इति भागुरिः । युद्धार्थं प्रथमाक्रान्तिः । इत्यपरे । कर्म्मारम्भे प्रथमयुक्तिः प्रयोगः । इत्यपरे ॥ इति भरतः ॥

प्रत्युत्क्रान्तिः, स्त्री, (प्रति+उत्+क्रम्+क्तिन् ।) प्रत्युत्क्रमः । इत्यमरटीकायां क्षीरस्वामी ॥

प्रत्युत्तरं, क्ली, (प्रतिरूपमुत्तरम् ।) उत्तरं प्रति उत्तरम् । यथा । ममेयं भूमिः क्रमागतत्वात् इति वादुक्ते ममेयं भूमिर्दशवर्षोपभुज्यमानत्वात् इति प्रत्युत्तरम् । इति व्यवहारतत्त्वम् ॥

प्रत्युत्थानं, क्ली, (प्रत्युत्थीयते इति । प्रति+उत्+स्था+ल्युट् ।) अभ्युत्थानम् । गात्रोत्थानम् । यथा,—